# श्रीमद् भागवत रसिक कुटुंब

## क्षमा प्रार्थना

ॐ अपराधसहस्राणि क्रियन्तेऽहर्निशं मया |
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि || 1 ||

आवाहनं न जानामि न जानामि विसर्जनम् |
पूजां(ञ्) चैव न जानामि क्षम्यतां परमेश्वरि || 2 ||

मन्त्रहीनं(ङ्) क्रियाहीनं भक्तिहीनं सुरेश्वरि |
यत्पूजितं मया देवि परिपूर्णं(न्) तदस्तु मे || 3 ||

अपराधशतं(ङ्) कृत्वा जगदम्बेति चोच्चरेत् |
यां(ङ्) गतिं समवाप्नोति न तां ब्रह्मादयः सुराः || 4 ||

सापराधोऽस्मि शरणं प्राप्तस्त्वां(ञ्) जगदम्बिके |
इदानीमनुकम्प्योऽहं(यँ) यथेच्छसि तथा कुरु || 5 ||

अज्ञानाद्विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं(ङ्) कृतम् |
तत्सर्वं(ङ्) क्षम्यतां(न्) देवि प्रसीद परमेश्वरि ॥6॥

**कामेश्वरि जगन्मातः(स्) सच्चिदानंदविग्रहे |**

**गृहाणार्चामिमां प्रीत्या प्रसीद परमेश्वरि || 7 ||**

**गुह्यातिगुह्यगोप्त्री त्वं(ङ्) गृहाणास्मत्कृतं(ञ्) जपम् |**

**सिद्धिर्भवतु मे देवि त्वत्प्रसादात्सुरेश्वरि || 8 ||**

